# Shri Durga Dhyanam

# श्रीदुर्गाध्यानम्

## Document Information

Text title : durgAdhyAnam 1

File name : durgAdhyAnam.itx

Category : dhyAnam, devii, devI, durgA

Location : doc_devii

Transliterated by : Shree Devi Kumar

Proofread by : PSA Easwaran

Acknowledge-Permission: Mahaperiaval Trust

Latest update : November 14, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 8, 2023

*sanskritdocuments.org*

Shri Durga Dhyanam

# श्रीदुर्गाध्यानम्

सिंहस्था शशिशेखरा मरकतप्रख्यैश्चतुर्भिर्भुजैः
शङ्खं चक्रधनुः शरांश्च दधती नेत्रैस्त्रिभिः शोभिता ।
आमुक्ताङ्गदहारकङ्कणरणत्काञ्ची रणन्नूपुरा
दुर्गा दुर्गतिहारिणी भवतु नो रत्नोल्लसत्कुण्डला ॥ १॥

मातर्मे मधुकैटभघ्नि महिषप्राणापहारोद्यमे
हेलानिर्जितधूम्रलोचनवधे हे चण्डमुण्डार्दिनि ।
निश्शेषीकृतरक्तबीजदनुजे नित्ये निशुम्भापहे
शुम्भध्वंसिनि संहराशु दुरितं दुर्गे नमस्तेऽम्बिके ॥ २॥

हेमप्रख्यामिन्दुखण्डार्धमौलिं
शङ्खारिष्टाभीतिहस्तां त्रिणेत्राम् ।
हेमाब्जस्थां पीतवस्त्रां प्रसन्नां
देवीं दुर्गां दिव्यरूपां नमामि ॥ ३॥

उद्यद्विद्युत्करालाकुलहरिगलसंस्थारिशङ्खासिखेटे-
ष्विष्वासाख्यत्रिशूलानरिगणभयदा तर्जनीं सन्दधाना ।
चर्मास्युत्तीर्णदोर्भिः प्रहरणनिपुणाभिर्वृता कन्यकाभिः
दद्यात्कार्शानभीष्टान् त्रिणयनललिता चापि कात्यायनी वः ॥ ४॥

अरिशङ्खकृपाणखेटबाणान् सुधनुः शूलककर्तरीं तर्जनीं दधाना ।
भजतां महिषोत्तमाङ्गसंस्था नवदूर्वासदृशीश्रियेऽस्तु दुर्गा ॥ ५॥

इति श्रीदुर्गाध्यानम् ॥

Additional

घस्राधीशघटागभस्तिघटिता व्याघ्रासना शीघ्रगा
सुघ्राणातिघृणाग्रणी घनकचा विघ्नौघनिघ्नात्मिका ।
घोराघातविघातिनी घनरवा घण्टास्वनैर्घर्घरा

दीर्घाक्षा घुसृणान्विताङ्घ्रिरुधिरा दुर्गाघसङ्घं द्यतु ॥ ६॥ श्रीव्रजकिशोरः

Proofread by PSA Easwaran

*Shri Durga Dhyanam*

pdf was typeset on January 8, 2023

Please send corrections to *sanskrit@cheerful.com*